# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा - मार्च/एप्रिल - २०२०

| | | |
|---|---|---|
| कक्षा-आचार्य-२ | प्रश्नपत्रम् – ३ | गुणाः – ७० |
| विषयः – वास्तुशास्त्रम् | सत्रम्- ४ (चतुर्थम्) | समयः- ११:३० तः ०२:३० |
| दिनाङ्कः – २८/०३/२०२० | सन्दर्भग्रन्थः – मयमतम् | |

---

### प्रथमान्वितिः (Unit 1) गुणाः

**प्रश्नः १ अधोलिखितयोरेकतरस्य व्याख्या कार्या।** ०५

१ समं तन्मण्डपं तस्य सान्तरालं सवेशकम्।
युग्मस्तम्भसमायुक्तं युक्त्या सर्वाङ्गशोभितम्।।

२ तले तले विमानानां दिशु देवान् न्यसेत् क्रमात्।
पूर्वायां द्वारपालौ तु नन्दिकालौ न विन्यसेत्।।

**प्रश्नः २ अधोलिखितयोरेकतरस्योपरि निबन्धं लिखत** १०

१ द्विभूमिविधानम्

२ प्रासादे सोपानविधानम्

### द्वितीयान्वितिः (Unit 2)

**प्रश्नः ३ अधोलिखितयोरेकतरस्य व्याख्या कार्या।** ०५

१ गुल्फायामसुपट्टैर्मतिभिः पट्टैस्तुकीलकं कुर्यात्।
एवं प्रोक्ता शिविका पैठिका नाम चित्राङ्गा।।

२ तुङ्गं नवगुणं कृत्वा सप्तभिः क्षपयेत्ततः।
शेषं सूर्यादिवारं स्यात् क्रूरास्तत्र विवर्जिताः।।

**प्रश्नः ४ अधोलिखितयोः कस्यचिदेकस्योपरि निबन्धं लिखत।** १०

१ लिङ्गप्रमाणम्

२ पीठलक्षणम्।

### तृतीयान्वितिः (Unit 3)

**प्रश्नः ५ अधोलिखितयोरेकतरस्य व्याख्या कार्या।** ०५

१ भवने जीर्णमथतत्कर्तव्यं चेत्तदन्यस्मिन्।
दिक्षु चतुर्ष्वपि नेष्टं तस्य वाह्यो वस्तुविदा।।

२ शिलादिपीठं निर्दोषं प्रयोज्यं चेत्तदेव हि।
ग्राह्यं व्रह्मशिलादिस्याद् द्रव्यं पिण्डं च पूर्ववत्।।

**प्रश्नः ६ अधोलिखितयोरेकतरस्योपरि निबन्धं लिखत।** १०

१ अनुकर्मविधानम्।

२ ब्रह्ममूर्तिलक्षणम्।

## चतुर्थान्वितिः (Unit 4)

**प्रश्नः ७ कस्यचिदेकस्य व्याख्या कार्या।** ०५

१ सर्वाभरणसंयुक्ते वामेऽवामे प्रयोजयेत्।
ग्रामादिवस्तुमध्ये च चतुर्दिक्षु प्रशस्यते।।

२ कपालिनीं शूलधरां वरदाभयपाणिकाम्।
अष्टहस्तं प्रकुर्वीत शूलकापालस्थितिर्नाम्।।

**प्रश्नः ८ अधोलिखितयोरेकतरस्योपरि निबन्धं लिखतु।** १०

१ लक्ष्मीमूर्तिलक्षणम्।

२ विशाचादिनां प्रतिमालक्षणम्।

## पञ्चान्वितिः (Unit 5)

**प्रश्नः ९ अधोलिखितेषु केषांचित् दशप्रश्नानामुत्तरं लिखत।** १०

१ मयमतम् इत्यस्य ग्रन्थस्य रचनाकारः कः?

२ केसर्यादिप्रासादाः कति प्रकारकाः भवन्ति?

३ अष्टमङ्गले प्रथमो मङ्गलः कः?

४ शङ्खमण्डलसोपानस्य लक्षणं लिखतु।

५ नागरप्रासादस्य अधिदेवः कः?

६ वेसरप्रासादस्य वर्णः कः?

७ नागरप्रासादस्य सत्वादिगुणेषु कः गुणः भवति?

८ द्राविड प्रासादस्य अधिदेवता कः?

९ गजमुखं कस्यां दिशि प्रशस्तो भवति?

१० गृहप्रवेशे नैवेद्यवलिविधौ प्रथमो बलिः कस्य देवस्य कृते भवति?

११ इन्द्रस्य कृते कस्यां दिशि वलिम् अर्पणीयम्?

१२ सूर्यादिप्रसादेषु सर्वोत्तमो प्रासादः कः?

१३ राजप्रासादे राज्ञः सिंहासनं कस्यां दिशि स्थापनीयम्?

१४ राजप्रासादे सभायां मन्त्रिणामासनं कस्मिन् कोणे स्थापनीयम्?

१५ देवगृहं कस्मिन् कोणे शुभो भवति?

*************************